वस्नोर्गित्त्वान्न स्थ ईकारः क्ङितोरीत्वशासनात् ।
गुणाभावस्त्रिषु स्मार्यः श्र्युकोऽनिट्त्वं गकोरितोः ॥ (म. भा. २. १३२)

[२८०] दंशेश्छन्दस्युपसङ्ख्यानम् ।

'दंक्षणवः पशवः' (वा. सं. १५. १५. ३) ।

## त्रसिगृधिधृषिक्षिपेः क्नुः । (१४०/३१२०)

त्रसादिभ्यो धातुभ्यः तच्छीलादिषु[1] क्नुः [2]प्रत्ययो भवति । त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ॥

## शमित्यष्टाभ्यो घिनुण् । (१४१/३१२१)

इति शब्दः [3]आद्यर्थः । शमादिभ्यो धातुभ्योऽ[4]ष्टाभ्यः तच्छीलादिषु कर्तृषु घिनुण् प्रत्ययो भवति । 'शम उपशमे' (धा. पा. १२०२) इत्यतः [5]प्रभृति 'मदी हर्षे' (धा.पा. १२०९) इत्येवमन्तः शमादिर्दिवाद्यन्तर्गणः । घकार [6]उत्तरत्र कुत्वार्थः । उकार उच्चारणार्थः । [7]णकारो वृद्ध्यर्थः । [8]शमी । तमी । दमी । श्रमी । भ्रमी । [9]क्लमी । प्रमादी । उन्मादी । अष्टाभ्यः इति किम् ? असिता ॥

## संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च । (१४२/३१२२)

घिनुण् अनुवर्तते । संपृचादिभ्यो धातुभ्यो घिनुण्[10] भवति तच्छीलादिषु[11] । 'पृची सम्पर्के' (धा. पा. १४६३) इति रुधादिर्गृह्यते नत्वदादिर्लुग्विकरणत्वात् । परिदेवि[12]भ्वादिर्गृह्यते 'देवृ देवने' (धा. पा. ५००) इति । 'क्षिप प्रेरणे' (धा. पा. ११२२, १२८६) दिवादिस्तुदादिश्च सामान्येन गृह्यते । 'युज समाधौ' (धा. पा. ११७८) दिवादिः, 'युजिर् योगे' (धा. पा. १४४५) रुधादिः । द्वयोरपि ग्रहणम् । 'रञ्ज रागे' (धा. पा. ११६८) इत्यस्य निपातनादनुनासिकलोपः । संपर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । [13]त्यागी । [14]रागी । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती ॥

## वौ कषलसकत्थस्रम्भः । (१४३/३१२३)

'कष [15]हिंसार्थः' (धा. पा. ६८५), 'लस श्लेषणक्रीडनयोः' (धा. पा. ७१४), 'कत्थ श्लाघायाम्' (धा. पा. ३७), 'स्रम्भु विश्वासे' (धा. पा. ७५७), [16]एतेभ्यो धातुभ्यो विशब्दे उपपदे घिनुण् प्रत्ययो भवति[17] । विकाषी । विलासी । विकत्थी । विस्रम्भी ॥

---

1. कर्तृषु इत्यधिकम् अ. ब. क. फ. ह. 2. प्रत्ययो भवति नास्ति फ. 3. आद्यर्थेऽनुवर्तते फ. ह, आद्यर्थे वर्तते अ. 4. अष्टाभ्यः नास्ति ब. 5. आरभ्य ब. 6. उत्तरसूत्रे ब. 7. वाक्यमिदं नास्ति ब. क. फ. 8. शमी नास्ति अ. 9. क्षमी फ. 10. प्रत्ययः इत्यधिकम् फ. 11. कर्तृषु इत्यधिकम् अ. ब. क. 12. भौवादिकः ब, भूवादिः अ. क, गृह्यते नास्ति फ. 13. यागी फ. 14. राजी ग. 15. हिंसायाम् ह. 16. इत्येतेभ्यः कषादिभ्यः फ. 17. तच्छीलादिषु कर्तृषु इत्यधिकम् ब. ड.